# सी.बी.एस.ई.
# हल प्रश्न-पत्र-2025
## संस्कृतम्
### कक्षा-10th

**अवधि :** होरात्रयम् | **पूर्णाङ्काः** 80
**निर्धारित समय :** 3 घण्टे | **अधिकतम अंक:** 80

**सामान्य निर्देशाः—**

अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति—

अस्मिन् प्रश्नपत्रे अष्टादश (18) प्रश्नाः सन्ति।

**खण्डः 'क'** — 1 - प्रश्नसंख्या 1

**खण्डः 'ख'** — 3 - प्रश्नसंख्या 2 – 4

**खण्डः 'ग'** — 7 - प्रश्नसंख्या 5 – 11

**खण्डः 'घ'** — 7 - प्रश्नसंख्या 12 – 18

विशिष्टनिर्देशानुसारं प्रश्नाः समाधेयाः।

उत्तरपुस्तिकायां लेखनात् पूर्वं सर्वप्रथमं प्रश्नसंख्या लेखनीया।

**Delhi & Outside Delhi Set** **कोड-52**

## खण्डः -'क'
## (अपठितावबोधनम्)
10 अंङ्काः

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** 10

परोपकारः अर्थात् परेषाम् उपकारः अस्ति। परोपकारस्य प्रवृत्त्या एव मनुष्यः पशुभ्यः पृथक् भवति। आहारादिप्रवृत्तिषु पशवः मानवैः समं भवन्ति, परं मानवः स्वविवेकेन ज्ञानेन च आत्मनः उन्नतिं करोति। अपि च, न केवलं मानवाः अपितु अस्माकं प्रकृतिः अपि परेभ्यः एव अस्ति। यथा वृक्षाः स्वफलानि न खादन्ति, ते परेषां कृते एव फलानि छायां च यच्छन्ति। नद्यः परोपकाराय एव वहन्ति। गावः अन्येभ्यः एव दुग्धं यच्छन्ति। अस्माकं पुण्यभूमौ अनेके महापुरुषाः अभवन् ये स्वप्राणान् परित्यज्य देशस्य समाजस्य च रक्षाम् अकुर्वन्। राजा शिविः शरणागतस्य कपोतस्य रक्षायै स्वशरीरस्य मांसं कर्तयित्वा श्येनाय दत्तवान्। ऋषिः दधीचिः अपि वृत्रासुरवधाय स्वास्थीनि सहर्षम् अयच्छत्। अद्यापि लोके अनेके समाजसुधारकाः सन्ति ये स्वार्थं परित्यज्य लोककल्याणं कुर्वन्ति। अतः सत्यमेव कथितम्—

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।**
**परोपकारः पुण्याय पापाय परपीडनम्॥**

**(अ) एकपदेन उत्तरत— (केवलं प्रश्नद्वयम्)** 2×1=2

(i) काः परोपकाराय एव वहन्ति?

(ii) केषु पशवः मानवैः समं भवन्ति?

(iii) कः वृत्रासुरवधाय स्वास्थीनि सहर्षम् अयच्छत्?

**(आ) पूर्णवाक्येन लिखत— (केवलं प्रश्नद्वयम्)** 2×2=4

(i) मनुष्यः पशुभ्यः कथं पृथक् भवति?

(ii) राजा शिविः शरणागतस्य कपोतस्य रक्षायै किं कृतवान्?

(iii) मानवः केन आत्मनः उन्नतिं करोति?

**(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** 1

**(ई) यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्)** 3×1=3

(i) 'गावः अन्येभ्यः एव दुग्धं यच्छन्ति' अत्र किं कर्तृपदम्?

(क) गावः (ख) अन्येभ्यः
(ग) यच्छन्ति (घ) एव

(ii) 'दधीचिः' इति विशेष्यपदस्य विशेषणपदं किम्?

(क) ऋषिः (ख) गावः
(ग) मानवः (घ) पशवः

(iii) 'तरवः' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

(क) नद्यः (ख) वृक्षाः
(ग) गावः (घ) फलानि

(iv) 'ते परेषां कृते एव फलानि छायां च यच्छन्ति' अस्मिन् वाक्ये 'ते' इति पदं कस्मै प्रयुक्तम्?

(क) जनेभ्यः (ख) सर्वेभ्यः
(ग) नदीभ्यः (घ) वृक्षेभ्यः

## खण्डः–'ख'
## (रचनात्मकं-कार्यम्)

15 अंङ्काः

**2. भवतः नाम ध्रुवः। भवान् उत्तरप्रदेशस्य एकस्मिन् छात्रावासे वसति। भवतः माता अरुणा भवन्तं अनुशासनस्य महत्वम् ज्ञापयितुं पत्रं लिखति। ध्रुवं प्रति लिखितं पत्र पूरयित्वा पुनः लिखत।** 10×½=5

12, गगनविहारः,
दिल्लीतः

प्रिय ध्रुव!

(i) ............... ।

अत्र (ii) ............... तत्रास्तु। (iii) ............... मन्ये तव अध्ययनं सम्यक् चलति यतः त्वम् अनुशासितः छात्रः असि। पुत्र! जीवनस्य प्रत्येकं क्षेत्रे अनुशासनस्य (iv) ............... आवश्यकता भवति। अनुशासनं हि नाम कर्तव्यपालनम्। सर्वेषां कृते (v) ............... आवश्यकम्। मानवजीवने कर्त्तव्य-अकर्तव्यबोधः अनुशासनेन एव भवति। परं च अद्यत्वे छात्रेषु अनुशासनस्य भावः न दृश्यते। ते (vi) ............... अनुशासनं न पालयन्ति। गुरून् मातपितृन् च (vii) ................ । त्वं कदापि एवं न कुरु यतः अनुशासनं विना जीवने (viii) ............... न प्राप्यते। त्वं स्व-स्वास्थ्यं प्रति अपि (ix) ............. भव। समयेन भोजनं कुरु, विश्रामम् अपि आवश्यकम्। शेषं सर्वं कुशलम्।

भवतः माता

(x) ............... ।

**मञ्जूषा**

| |
|---|
| महती, सावधानः, तिरस्कुर्वन्ति, अनुशासनम्, अहम्, चिरंजीव, अरुणा, साफल्यम्, विद्यालयस्य, कुशलम्। |

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत—** 5×1=5



**मञ्जूषा**

| |
|---|
| उपवनम्, महिला, वृक्षाः, सूर्योदयः, स्वच्छम्, कृषकाः, हरीतिमा, बालकाः, खगाः, उदेति, व्यायामः, पित्रा, बालिका, पुष्पाणि, धावति, वातावरणम्, आकाशे, सन्ति। |

**अथवा**

**निम्नलिखितं विषयम अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत—**

**'योगस्य लाभाः'**

**मञ्जूषा**

| |
|---|
| शरीरम्, स्वस्थः, जनाः, आनन्दम्, प्रातःकाले, मानसिकम्, स्वास्थ्यम्, स्फूर्तिः, भवति, अनुभवन्ति, सर्वे, छात्राः, समयानुसारम्, यथाशक्ति। |

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत—(केवलं वाक्यपञ्चकम्)—** 5×1=5

**(i)** हम सब संस्कृत पढ़ते हैं।
We all study Sanskrit.

**(ii)** हमें अपने स्वास्थ्य की रक्षा करनी चाहिए।
We should take care of our health.

**(iii)** सैनिकों ने देशरक्षा के लिए युद्ध किया।
The soldiers fought for the defence of their country.

**(iv)** वे सब मैदान में खेलने जाएँगे।
They will go to play in the field.

**(v)** चारों वेद ईश्वर की वाणी हैं।
The four Vedas are words of God.

**(vi)** बच्चों! तुम वहाँ जाओ।
Children! You go there.

**(vii)** सबको सदैव प्रसन्न रहना चाहिए।
All should be happy always.

## खण्डः–'ग'
## (अनुप्रयुक्त-व्याकरणम्)

25 अंङ्काः

**5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत— (केवलं प्रश्नचतुष्टयम्)—** 4×1=4

**(i)** नास्ति <u>योजकः + तत्र</u> दुर्लभः।

**(ii)** जन्तून् पार्थिवरूपेण स <u>कृतान्तो न</u> संशयः।

**(iii)** सर्वथा <u>सम्यक् + उक्तं</u> सिंहमहोदयेन।

**(iv)** कृषकः क्षेत्रकर्षणं <u>कुर्वन्नासीत्</u>।

**(v)** <u>एतयोर्जननी</u> तेनावमानिता निर्वासिता।

**6. रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत— (केवलं प्रश्नचतुष्टयम्)** 4×1=4

**(i)** नास्ति किञ्चित् <u>निरर्थकम्</u>।

**(क)** अर्थस्य योग्यम् **(ख)** अर्थस्य प्रति
**(ग)** अर्थस्य सहितम् **(घ)** अर्थस्य अभावः

**(ii)** नैव <u>जनग्रसनम्</u>।

**(क)** जनेषु ग्रसनम् **(ख)** जनान् ग्रसनम्
**(ग)** जनानां ग्रसनम् **(घ)** जनेभ्यः ग्रसनम्

OSWAAL BOOKS & LEARNING PVT. LTD.

(iii) सर्वेषु अपत्येषु जननी तुल्यवत्सला।
(क) तुल्यं वत्सलं यस्याः सा (ख) तुल्यं वत्सलं यस्य सः
(ग) तुल्यं वत्सलम् (घ) तुल्यं वत्सलं सा

(iv) तयोः एकः शरीरेण दुर्बलः आसीत्।
(क) शरीरादुर्बलः (ख) शरीरदुर्बलः
(ग) शरीर्दुर्बलः (घ) शरीरेदुर्बलः

(v) क्षत्रियकुलपितामहयोः सूर्ये च चन्द्रे च को वा भवतोर्वंशस्य कर्ता।
(क) सूर्यचन्द्रः (ख) सूर्यचन्द्रयोः
(ग) सूर्यचन्द्राभ्याम् (घ) सूर्यचन्द्रौ

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत— (केवलं प्रश्नचतुष्टयम्) 4×1=4**

(i) कुसुमावलिः समीरचालिता मे वरणीया।
(क) वरणीय + आ (ख) वरणीया + आ
(ग) वरणीय + टाप् (घ) वरणीय + इन्

(ii) मम पिता मह्यम् एकां संस्कृतस्य मास + ठक् पत्रिकाम् आनीतवान्।
(क) मासिकम् (ख) मासिका
(ग) मासिकीम् (घ) मासिकः

(iii) आकारस्य लघु + त्व कार्यबाधकः न भवति।
(क) लघुत्वम् (ख) लघुत्व
(ग) लघुता (घ) लघुत्वा

(iv) जनैः गङ्गायाः शुद्धता करणीया।
(क) शुद्ध + टाप् (ख) शुद्ध + तल्
(ग) शुद्ध + त्व (घ) शुद्ध + क्त्वा

(v) ताः कन्याः गुणवत्यः सन्ति।
(क) गुण + मतुप् (ख) गुण + टाप्
(ग) गुण + त्व (घ) गुण + क्तवतु

**8. वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत— (केवलं प्रश्नत्रयम्) 3×1=3**

(i) त्वया चित्राणि .............।
(क) दृश्यन्ते (ख) दृश्ये
(ग) दृश्येते (घ) दृश्यते

(ii) ............. ध्यानेन पठनं करोमि।
(क) मह्यम् (ख) माम्
(ग) अस्माभिः (घ) अहम्

(iii) साधुना ............. क्रियते।
(क) पूजायाम् (ख) पूजा
(ग) पूजायाः (घ) पूजाम्

(iv) किं त्वया ग्रामः ............. ?
(क) गम्यन्ते (ख) गम्येते
(ग) गच्छामि (घ) गम्यते

**9. कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत— (केवलं प्रश्नचतुष्टयम्) 4×1=4**

(i) मम मित्रं प्रातः (6:45) धावनं करोति।
(ii) तदा सः (8:00) विद्यालयं गच्छति।
(iii) (1:30) विद्यालयात् गृहम् आगच्छति।
(iv) सायंकाले (4:15) क्रिकेटक्रीडां क्रीडति।
(v) तदन्तरं सः (7:00) पठनं करोति।

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत— (केवलं प्रश्नत्रयम्) 3×1=3**

(i) तव भोजनावकाशः ........... भविष्यति?
(ii) ............. मम जन्मदिवसे मम गृहे यज्ञम् अभवत्।
(iii) यदि सर्वे प्रयासं न करिष्यन्ति ............. पर्यावरणं शुद्धं न भविष्यति।
(iv) शिशुः ............. चलित्वा मातुः समीपम् आगच्छत्।

**मञ्जूषा**

| ह्यः, शनैः, तर्हि, कदा। |
|---|

**11. अधोलिखितवाक्येषु रेखाङ्कित—अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत— (केवलं प्रश्नत्रयम्) 3×1=3**

(i) सा शोभना कन्या सन्ति।
(क) आसम् (ख) स्तः
(ग) अस्तु (घ) अस्ति

(ii) नीलः गगनं शोभते।
(क) नीलाम् (ख) नीलम्
(ग) नीला (घ) नीलस्य

(iii) शाखेषु खगाः सन्ति।
(क) शाखायाम् (ख) शाखे
(ग) शाखा (घ) शाखया

(iv) पिता पुत्राय स्निह्यति।
(क) पुत्रस्य (ख) पुत्रेण
(ग) पुत्रे (घ) पुत्रौ

## खण्डः-'घ'
## (पठितावबोधनम्)
**30 अङ्काः**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत— 5**

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद—"कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"

OSWAAL BOOKS & LEARNING PVT. LTD.

**(i) एकपदेन उत्तरत— (केवलं प्रश्नद्वयम्)** 2×½=1

**(क)** राजसिंह: कुत्र वसति स्म?

**(ख)** बुद्धिमती पुत्रद्वयोपेता कुत्र चलिता?

**(ग)** सा कुत्र एकं व्याघ्रं ददर्श?

**(ii) पूर्णवाक्येन उत्तरत— (केवलं प्रश्नद्वयम्)** 2×1=2

**(क)** सा पुत्रौ चपेटया प्रहृत्य किम् जगाद?

**(ख)** एकदा का पितु: गृहं प्रति चलिता?

**(ग)** बुद्धिमती किमर्थं पितुर्गृहं प्रति चलिता?

**(iii) भाषिककार्यम्— (केवलं प्रश्नद्वयम्)** 2×1=2

**(क)** 'जगाद' इति क्रियापदस्य कर्तृपदं किम्?

**(ख)** 'व्याघ्रम्' इति पदस्य विशेषणपदं किम्?

**(ग)** अनुच्छेदे 'अपश्यत्' इत्यस्य पदस्य क: पर्याय: प्रयुक्त:?

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत—** 5

रे रे चातक! सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशा:।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वच:॥

**(i) एकपदेन उत्तरत— (केवलं प्रश्नद्वयम्)** 2×½=1

**(क)** अस्मिन् श्लोके कवि: कं सम्बोधयति?

**(ख)** कीदृशं वच: न ब्रूहि?

**(ग)** अम्भोदा: कुत्र सन्ति?

**(ii) पूर्णवाक्येन उत्तरत— (केवलं प्रश्नद्वयम्)** 2×1=2

**(क)** बहव: के सन्ति?

**(ख)** सर्वस्य पुरत: किं न वक्तव्यम्?

**(ग)** के वृष्टिभि: वसुधां आर्द्रयन्ति?

**(iii) भाषिककार्यम्— (केवलं प्रश्नद्वयम्)** 2×1=2

**(क)** 'केचिद् वृथा गर्जन्ति।' अत्र 'केचिद्' पदं केभ्य: प्रयुक्तम्?

**(ख)** 'बहव: अम्भोदा:' अनयो: पदयो: विशेषणपदं किम्?

**(ग)** श्लोके 'समक्षम्' इत्यस्य पदस्य क: पर्याय: प्रयुक्तोऽस्ति?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत—** 5

*सुरभि:* — भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। स: दीन इति जानन्नपि कृषक: तं बहुधा पीडयति। स: कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं स: न शक्नोति। एतत् भवान् पश्यति न?" इति प्रत्यवोचत्।

"भद्रे! नूनम्। सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्?" इति इन्द्रेण पृष्टा सुरभि: प्रत्यवोचत् – "बहून्यपत्यानि मे सन्तीति सत्यम् तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बल:। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातु: अभ्यधिका कृपा सहजैव" इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।

स च तामेवमसान्त्वयत् – "गच्छ वत्से! सर्वं भद्रं जायेत।"

**(i) एकपदेन उत्तरत— (केवलं प्रश्नद्वयम्)** 2×½=1

**(क)** कस्य दैन्यं दृष्ट्वा सा रोदिति?

**(ख)** सर्वेष्वपत्येषु का तुल्यवत्सला?

**(ग)** स: केन भारमुद्वहति?

**(ii) पूर्णवाक्येन उत्तरत— (केवलं प्रश्नद्वयम्)** 2×1=2

**(क)** कस्मिन् मातु: अभ्यधिका कृपा सहजैव?

**(ख)** सुरभिवचनं श्रुत्वा किम् अभवत्?

**(ग)** आखण्डल: किं कथयित्वा सुरभिम् असान्त्वयत्?

**(iii) भाषिककार्यम्— (केवलं प्रश्नद्वयम्)** 2×1=2

**(क)** 'सुते' इति पदस्य विशेषणपदं किम्?

**(ख)** 'पीडयति' इति क्रियापदस्य कर्तृपदं किम्?

**(ग)** 'आकर्ण्य' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

**15. अधोलिखित-रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत— (केवलं प्रश्नचतुष्टयम्)** 4×1=4

**(i)** जनकेन शैशवे सुताय विद्याधनं दीयते।

**(ii)** प्रकृत्या: सन्निधौ वास्तविकं सुखं विद्यते।

**(iii)** भ्रातरौ आवाम् सोदर्यौ स्व:।

**(iv)** सिंह: वानराभ्यां स्वरक्षायाम् असमर्थ: एवासीत्।

**(v)** तत्र राजसिंह: नाम राजपुत्र: वसति स्म।

**16. मञ्जूषात: समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुन: लिखत—** 4×1=4

**दुष्कराण्यपि कर्माणि मतिवैभवशालिन:।**
**नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते॥**

**अन्वय:—**

मतिवैभवशालिन: (जना:) (i) ............... युक्तिं (च) (ii) ................ दुष्कराणि (iii) ............. कर्माणि (iv) ......... एव प्रकुर्वते।

OSWAAL BOOKS & LEARNING PVT. LTD.

**मञ्जूषा**

| लीलया, नीतिम्, अपि, समालम्ब्य। |
|---|

**अथवा**

**अधोलिखितश्लोकस्य भावार्थं रिक्तस्थानानि मञ्जूषायाः साहाय्येन पूरयित्वा पुनः लिखत—** **4×1=4**

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः॥

**भावार्थः**

अस्य भावोऽस्ति यत् काकस्य वर्णः (i) .............. वर्तते (ii) ................ अपि वर्णः कृष्णः एव अस्ति। अतः तयोः (iii) ............. मध्ये कः भेदः अस्ति? अर्थात् वर्णदृष्ट्या तयोः कश्चिद् भेदो न दृश्यते। परन्तु यदा (iv) .............. समयः आगच्छति तदा तयोः स्वरैः ज्ञायते यत् कः काकः अस्ति कश्च पिको वर्तते।

**मञ्जूषा**

| वसन्तस्य, पिकस्य, पिककाकयोः, कृष्णः। |
|---|

**17. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत—** **8×½=4**

**(i)** एकः सिंहः विश्राम्यते स्म।
**(ii)** ततः प्रकृतिमाता प्रविशति।
**(iii)** वानराः तं तुदन्ति स्म।
**(iv)** अधुना पशुः राजा न भवेत् अपितु कोऽपि पक्षी एव राजेति निश्चेतव्यम्।
**(v)** सर्वे प्राणिनः सिंहस्य दशां दृष्ट्वा हसन्ति।
**(vi)** सर्वेषां प्राणिनामेव यथासमयं महत्त्वं विद्यते।
**(vii)** सर्वे प्राणिनः परस्परं विवादं कुर्वन्ति आत्मानं योग्यं च कथयन्ति। अन्ते निर्णयं कुर्वन्ति यत्—
**(viii)** मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम्।

**18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत— (केवलं प्रश्नत्रयम्)** **3×1=3**

**(i)** अश्वश्चेद् धावने वीरः भारस्य वहने <u>खरः</u>।

(क) गजः (ख) सिंहः
(ग) गर्दभः (घ) व्याघ्रः

**(ii)** सर्वेषु <u>अपत्येषु</u> जननी तुल्यवत्सला।

(क) सन्ततिषु (ख) पुत्रीषु
(ग) शिष्येषु (घ) जनेषु

**(iii)** <u>वायसः</u> वसन्तस्य गुणं न जानाति।

(क) पिकः (ख) काकः
(ग) मयूरः (घ) शुकः

**(iv)** <u>अनृतं</u> वदसि चेत् काकः दशेत्।

(क) उच्चैः (ख) शनैः
(ग) सत्यम् (घ) असत्यम्

❑❑❑

OSWAAL BOOKS & LEARNING PVT. LTD.

# उत्तरमाला

## खण्डः–'क' (अपठितावबोधनम्) 10 अंङ्काः

1. **(अ) एकपदेन उत्तरतः—** 2×1=2
   (i) नद्यः
   (ii) आहारादिप्रवृत्तिषु
   (iii) ऋषिः दधीचिः

**(आ) पूर्णवाक्येन उत्तरतः—** 2×2=4
   (i) परोपकारस्य प्रवृत्या एव मनुष्यः पशुभ्यः पृथक् भवति।
   (ii) राजा शिविः शरणागतस्य कपोतस्य रक्षायै स्वशरीरस्य मांसं कर्त्तयित्वा श्येनाय दत्तवान्।
   (iii) मानवः स्वविवेकेन ज्ञानेन च आत्मनः उन्नतिं करोति।

**(इ)** शीर्षकं–परोपकारः/परेषाम् उपकारः। 1

**(ई) यथानिर्देशम् उत्तरत—** 3×1=3
   (i) (क) गावः
   (ii) (क) ऋषिः
   (iii) (ख) वृक्षाः
   (iv) (घ) वृक्षेभ्यः

## खण्डः–'ख' (रचनात्मकं-कार्यम्) 15 अंङ्काः

2. **पत्रलेखनम्—** 10×½=5

प्रिय ध्रुव! 12, गगनविहारः,
(i) चिरंजीव! दिल्लीतः

अत्र (ii) कुशलम् तत्रास्तु (iii) अहम् मन्ये तव अध्ययनं सम्यक् चलति यतः त्वम् अनुशासितः छात्रः असि। पुत्र! जीवनस्य प्रत्येकं क्षेत्रे अनुशासनस्य (iv) महती आवश्यकता भवति। अनुशासनं हि नाम कर्त्तव्यपालनम्। सर्वेषां कृते (v) अनुशासनम् आवश्यकम्। मानव–जीवने कर्त्तव्य–अकर्त्तव्यबोधः अनुशासनेन एव भवति। परं च अद्यत्वे छात्रेषु अनुशासनस्य भावः न दृश्यते। ते (vi) विद्यालयस्य अनुशासनं न पालयन्ति। गुरून् मातापितृन् च (vii) तिरस्कुर्वन्ति। त्वं कदापि एवं न कुरु यतः अनुशासनं बिना जीवने (viii) साफल्यम् न प्राप्यते। त्वं स्व-स्वास्थ्यं प्रति अपि (ix) सावधानः भव। समयेन भोजनं कुरु, विश्रामम् अपि आवश्यकम्। शेषं सर्वं कुशलम्।

भवतः माता
(x) अरुणा।

3. **चित्रवर्णनम्—** 5×1=5
   (i) अस्मिन् चित्रे उपवनम् दृश्यते।
   (ii) आकाशे खगाः उड्डयन्ति।
   (iii) बालकाः उपवने धावन्ति।
   (iv) उपवनस्य वातावरणम् स्वच्छं प्रतीयते।
   (v) प्रातः काले सूर्यः उदेति।

**अथवा**

**अनुच्छेदलेखनं— 'योगस्य लाभाः'** 5×1=5
   (i) व्यायमेन शरीरम् स्वस्थं भवति।
   (ii) सर्वे जनाः प्रातःकाले योगाः कुर्वन्ति।
   (iii) नरः योगं कृत्वा मानसिकं शान्तिं प्राप्नोति।
   (iv) सर्वे छात्राः आनन्दम् अनुभवन्ति।
   (v) यथाशक्ति योगंकरणीयं।

4. **संस्कृते अनुवाद—** 5×1=5
   (i) वयम् संस्कृतं पठामः।
   (ii) वयं स्व–स्वास्थ्यं रक्षेम।
   (iii) सैनिकाः देशरक्षायै युद्धं अकुर्वन्।
   (iv) ते क्रीडा–क्षेत्रे क्रीडितुं गमिष्यन्ति।
   (v) चत्वारः वेदाः ईश्वरस्य वाणीः सन्ति।
   (vi) बालकाः। त्वं तत्र गच्छ।
   (vii) सर्वे सर्वदा प्रसन्नं भवेयुः।

## खण्डः–'ग' (अनुप्रयुक्त-व्याकरणम्) 25 अंङ्काः

5. **सन्धिच्छेदं—** 4×1=4
   (i) योजकस्तत्र
   (ii) कृत + अन्तो/कृत + अन्तः
   (iii) सम्यगुक्तं
   (iv) कुर्वन + आसीत्।
   (v) एतयोः + जननी।

6. **समासविग्रहं—** 4×1=4
   (i) (घ) अर्थस्य अभावः
   (ii) (ग) जनानां ग्रसनम्
   (iii) (क) तुल्यं वत्सलं यस्याः सा
   (iv) (ख) शरीरदुर्बलः
   (v) (ख) सूर्यचन्द्रयोः

7. **प्रकृति-प्रत्यय—** 4×1=4
   (i) (ग) वरणीय + टाप्
   (ii) (क) मासिकम्
   (iii) (क) लघुत्वम्
   (iv) (ख) शुद्ध + तल्
   (v) (क) गुण + मतुप्

OSWAAL BOOKS & LEARNING PVT. LTD.

**8. संवादं** 3×1=3

(i) त्वया चित्राणि (क) दृश्यन्ते।

(ii) (घ) अहम् ध्यानेन पठनं करोमि।

(iii) साधुना (ख) पूजा क्रियते।

(iv) किं त्वया ग्रामः (घ) गम्यते?

**9. कालबोधकशब्दैः** 4×1=4

(i) पादोन-सप्तवादने

(ii) अष्टवादने

(iii) सार्ध एक वादने

(iv) सपाद (चतुर्वादने)

(v) सप्तवादनम्

**10. अव्ययपदानि—** 3×1=3

(i) कदा

(ii) ह्यः

(iii) तर्हि

(iv) शनैः

**11. अशुद्धपदानि—** 3×1=3

(i) सा शोभना कन्या (घ) अस्ति।

(ii) (ख) नीलम् गगनं शोभते।

(iii) (क) शाखायाम् खगाः सन्ति।

(iv) पिता (ग) पुत्रे स्निह्यति।

## खण्डः–'घ' (पठित-अवबोधनम्) 30 अङ्काः

**12. पठित गद्यांश—** 5

(i) **एकपदेन—** 2×½=1

(क) देउलाख्यग्रामे

(ख) पितुर्गृहं

(ग) गहनकानने

(ii) **पूर्णवाक्येन—** 2×1=2

(क) सा पुत्रौ चपेटया प्रहृत्य जगाद — "कथमेकैकशो व्याघ्र भक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"

(ख) एकदा बुद्धिमती पितुर्गृहं प्रति चलिता।

(ग) बुद्धिमती केनापि आवश्यककार्येण पितुर्गृहं प्रति चलिता।

(iii) **भाषिक कार्यम्—** 2×1=2

(क) सा (बुद्धिमती)

(ख) एकं

(ग) ददर्श।

**13. पद्यांश—** 5

(i) **एकपदेन—** 2×½=1

(क) चातकं

(ख) दीनं

(ग) गगने

(ii) **पूर्णवाक्येन—** 2×1=2

(क) बहवः अम्भोदाः सन्ति।

(ख) सर्वस्य पुरतः दीनं वचः न वक्तव्यम्।

(ग) अम्भोदाः वृष्टिभिः वसुधां आर्द्रयन्ति।

(iii) **भाषिक कार्यम्—** 2×1=2

(क) अम्भोदेभ्यः

(ख) बहवः

(ग) पुरतः

**14. नाट्यांशं—** 5

(i) **एकपदेन—** 2×½=1

(क) पुत्रस्य

(ख) जननी

(ग) कृच्छ्रेण

(ii) **पूर्णवाक्येन—** 2×1=2

(क) दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव।

(ख) सुरभि वचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।

(ग) आखण्डलः इदम् कथयित्वा सुरभिम् असान्त्वयत्—"गच्छ वत्से! सर्वं भद्रं जायेत।"

(iii) **भाषिककार्यम्—** 2×1=2

(क) दुर्बले

(ख) कृषकः

(ग) श्रुत्वा

**15. प्रश्ननिर्माणम्—** 4×1=4

(i) जनकेन शैशवे कस्मै विद्याधनं दीयते?

(ii) कस्याः सन्निधौ वास्तविकं सुखं विद्यते?

(iii) कौ आवाम् सोदर्यौ स्वः?

(iv) सिंहः काभ्यां स्वरक्षायाम् असमर्थः एवासीत्?

(v) तत्र राजसिंहः नाम कः वसति स्म?

**16. अन्वयः—** 4×1=4

मतिवैभवशलिनः (जनाः) (i) नीतिं युक्तिं (च) (ii) समालम्ब्य दुष्कराणि (iii) अपि कर्माणि (iv) लीलया एव प्रकुर्वते।

**अथवा**

**भावार्थः** 4×1=4

अस्य भावोऽस्ति यत् काकस्य वर्णः (i) कृष्णः वर्तते (ii) पिकस्य अपि वर्णः कृष्णः एव अस्ति। अतः तयोः (iii) पिककाकयोः

OSWAAL BOOKS & LEARNING PVT. LTD.

मध्ये क: भेद: अस्ति? अर्थात् वर्णदृष्ट्या तयो: कश्चिद् भेदो न दृश्यते। परन्तु यदा (iv) वसन्तस्य समय: आगच्छति तदा तयो: स्वरै: ज्ञायते यत् क: काक: अस्ति कश्च पिको वर्तते।

**17. घटनाक्रमानुसारं —** **8×½=4**

**(i)** एक: सिंह: विश्राम्यते स्म।

**(ii)** वानरा: तं तुदन्ति स्म।

**(iii)** सर्वे प्राणिन: सिंहस्य दशां दृष्ट्वा हसन्ति।

**(iv)** सर्वे प्राणिन: परस्परं विवादं कुर्वन्ति आत्मानं योग्यं च कथयन्ति। अन्ते निर्णयं कुर्वन्ति यत्।

**(v)** अधुना पशु: राजा न भवेत् अपितु कोऽपि पक्षी एव राजेति निश्चेतव्यम्।

**(vi)** तत: प्रकृतिमाता प्रविशति।

**(vii)** सर्वेषां प्राणिनामेव यथा समयं महत्वं विद्यते।

**(viii)** मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरूध्वम्।

**18. प्रसङ्गानुकूलम् उचितार्थं—** **3×1=3**

**(i)** (ग) गर्दभ:

**(ii)** (क) सन्ततिषु

**(iii)** (ख) काक:

**(iv)** (घ) असत्यम्।

❑❑❑

OSWAAL BOOKS & LEARNING PVT. LTD.